International Journal of Sanskrit Research 2024; 10(2): 171-172

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(2): 171-172
© 2024 IJSR
www.anantaajournal.com
Received: 12-01-2024
Accepted: 16-02-2024

**डॉ. कुलदीपकुमारः**
संस्कृत विभागः, हिमाचलप्रदेश केन्द्रीयविश्वविद्यालयः, धर्मशाला, हिमाचल प्रदेश, भारत

**चमनलालः**
शोधार्थी (पी एच डी), हिमाचलप्रदेश केन्द्रीयविश्वविद्यालयः, धर्मशाला, हिमाचल प्रदेश, भारत

**Corresponding Author:**
**डॉ. कुलदीपकुमारः**
संस्कृत विभागः, हिमाचलप्रदेश केन्द्रीयविश्वविद्यालयः, धर्मशाला, हिमाचल प्रदेश, भारत

# आयुर्वेद शास्त्रे भूतविद्यायाः सामान्याध्ययनम्

**डॉ. कुलदीपकुमारः, चमनलालः**

**सारांश**

आयुर्वेदस्य विविधाः परिभाषा आचार्यैः वर्णिता सन्ति। केचन मन्यते यत् अयं 'जीवनस्य विज्ञानमस्ति', अतः आयुषो-विषये यत् किमपि ज्ञानमुपलभ्यते, तत सर्वम्-अत्र समाहार्यम्। यया विद्यया रोगानां नाशो भवेत्, मानवानां च जीवनमारोग्यं दीर्घायुष्यं च स्यात्, सा विद्या आयुर्वेदीया विद्या वर्तते।[1] एवञ्च चिकित्साजगति यच्चैरन्तनं ज्ञानं जातमास्ते यच्च नूत्नं रमणीयं जीवनोपयोगिज्ञानं विश्वस्मिन् यत्र क्वापि प्रचलितं दृश्यते, तदत्र सात्मीकृतं स्यात्।

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः पर प्रत्ययनेय बुद्धिः।।[2]

इत्यनुसारं नीर-क्षीर-विवेक बुद्धया, धैर्येण, परिश्रमेण च यद्-आधुनिकैरायुर्विषये ज्ञानमाविष्कृतं वर्तते, आयुर्वेदश्चैकमतीव महत्त्वपूर्णं विज्ञानस्ति। विज्ञानं च सार्वभौमं भवति सार्वजजीनं भवति, न तत्र कस्यापि जातेरधिकारः स्वीक्रियते, एवं चेदमपि निगदितुं शम्यते यत् 'कृतानि पुत्रैरकृतानि पूर्वैः' अर्थात् ह्यो यदविदितमासीत्, तदद्य ज्ञायते, अद्य वा यदविदितमस्ति तत्, श्वो ज्ञातुं शक्यते। विज्ञानस्य बुद्धेश्य सीमाङ्कनं नैवास्ति। विज्ञानविषये चाहर्निशं गवेषणा बोभवीति। अतश्च ते प्राच्य चिकित्सा विज्ञानस्यात्याधुनिकस्य च चिकित्सा विज्ञानस्य सामञ्जस्यं विदधति।[3] ज्ञानं च पवित्रतमं वस्तु तद्धरणे च सततं प्रयतितव्यम्। 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते''। इदं च विज्ञानं शाश्वतं सत्यं सनातनं विश्वजनीनं सर्वप्राणिहितकरं सार्वभौमं विज्ञानमस्ति। न चात्र रूढिग्रस्तता परिलक्ष्यते। दृश्यते किल यत् वैदिके काले या चिकित्सा पद्धतिरासीत्, सा चरकसुश्रुतादिकाले विकासमाप।[4]

**कूटशब्दः** आयुर्वेद्, जीवनमारोग्यं, भूतविद्या, अष्टाङ्गायुर्वेद्, यजुर्वेदीयतैत्तिरीय संहिता

## प्रस्तावना

### भूतविद्यायाः स्वरुपम्

आयुर्वेदशास्त्रे सर्वेषामेव रोगाणं द्विविधा प्रकृतिराम्नाता[5] एके चामयाः वातपित्तकफेभ्यो निर्वर्वन्ते[6], त एते सर्व एव निजा विकारा अभिधीयन्ते। अपरे चामयास्तादृशा भवन्ति, येषु न यथार्थ्येन दोष-दूष्य-हेतु-पूर्वरुप-रुपोपशयसम्प्राप्ति पूर्वकं निदानादिकं कर्तुपार्यते तादृशा हि रोगा आगन्तबीऽभिधीयन्ते।[7] अस्मिन अङ्गे रोगाणां स्वातन्त्र्येण निदानादिकम् अकलितमास्ते। अत्र च सङ्कलितानां रोगाणां नावश्यं वातादि जन्यत्वमुत वा रजस्तमो - जन्यत्वमङ्गीकृतमपि तु आगन्तव एव हेतवो भवन्ति। विशिष्ट लक्षण दर्शननाच्च तेषां तेषां देवानां भूतादीना ग्रहाणां पिशाच डाकिनी शाकिनी प्रभृतीनामभिनिवेश एव कारणत्वेन परिगणितो भूतविद्या सम्बन्धि रोगाणाम्। संहिताग्रन्थेषु न शल्यतन्त्रे, कौमारभृत्ये, सूतिकासु, शल्याक्रान्तेषु, अपचारिषु, चैत्य-शूना-शून्यागारवासिषु वा रक्षः - प्रभूतीनामाक्रमणं भवति इति प्रतिपादितम तज्जानाञ्च विकारणां विनिश्चयार्थं सम्यग्ज्ञानार्थमुपशमनार्थञ्च वातादिदोषाचिकित्साभिन्ना काचन चिकित्साप्रणाली परिगृह्यते।[8]

अत्र विभागे वर्णिताश्च शब्दाः स्वपरिभाषा अनुसारम् अर्थान् व्यञ्जयन्ति। रोगाणामुत्पन्तिः नामानि, संस्थानादिकं सर्वमेव गूढमवतिष्ठते। एषा च विद्या औपनिषदिकयाऽपराविद्यया साम्यं भजते। उपनिषत्सु द्वे विधे प्रतिपादिते स्तः। परा, अपरा चेति। तत्र परा महद्गौरवास्पदा पुरुषस्य कैवल्यार्थम्-उपदिष्टा। अपरा च महामोहमयी, प्रलयोदयदात्री, तमोमयी, सर्वासामापदां मूलम्। ये चात्मज्ञानोदयभूतां परां विद्यां नोपासते ते भौतिकेषु विषयेषु लीनाः, साभिमाना दम्भिनो देवादींश्च तिरस्कुर्वन्ति, न च श्रद्दधते धर्माचरणे, पूज्यान धर्षयन्ति, स्वैराचराः, सर्वाविनयानां भूमयो भवन्ति।

एवञ्च यैरपरविद्या समुपास्यते त एव भवन्ति भाजनानि भूतविद्या सम्बन्धिव्याधीनाम्।[9] अष्टाङ्गायुर्वेदशास्त्रे 'भूतविद्या'[10] रहस्यात्मकम् - अन्यतमम् अङ्गम् एषा च विद्या 'अथर्ववेदीया विद्यते। आयुर्वेदस्य चाथर्ववेदेन सह उपजीव्योपजीवक-भावसम्बधो वर्तते। यथा उक्तं चरकः - तत्रभिषजा पृष्टेनैवं चतुर्णामृग्यजुः सामाथर्ववेदानागात्मनोऽथर्ववेदे भक्तिः आदेश्या वेदो ह्य अथर्वणो दान-स्वस्ति-बलि-मङ्गल-होम-नियम-प्रायश्चित्तोपवास-मन्त्रादिपरि ग्रहाच्चिकित्सां प्राह इति।[11]

भारतीयवाङ्मयेषु यथाऽथर्ववेदे भूत विद्याया वैशद्यैन वर्णनं दृश्यते तथा नान्यत्र। सर्वत्रः प्रथमं तत्रैव रोगाणां राक्षसादिभिः सह सम्बन्धः स्थापितो वर्तते। देवासुर पिशाचादयश्च व्याधिकारणानि निर्दिष्टानि। अपं च सिद्धान्तस्तत एवायुर्वेदे समागत इत्यामनन्ति प्राञ्चो महर्षयः त्रग्वेदे-भूतविद्या-अस्मिन वेदे नानाविषकृमिव्याधिवर्णनम्, तत्प्रतीकार-विधानञ्चोपलभ्यते।[12] सूर्यचिकित्सया हृद्रोगादीनां निरसनम्[13] जलस्य भेषजत्वम् अपस्माररोगस्य[14] च वर्णनम् उपलभ्यते।

**यजुर्वेदीयतैत्तिरीय संहितायां भूतविद्या**

यजुर्वेद पिशाचाः राक्षसा-असुराश्च सहचरत्वेन वर्णिताः। एवञ्च ते देवानां मनुष्याणां पितृणाञ्च विरोधिन उक्ताः। तथा च 'देवाः मनुष्याः पितरस्तेऽन्यत आसन्नसुरा रक्षांसि पिशाचास्तेऽन्यतस्तेषां देवानामुत यदल्पं लोहितमकुर्वन् यद रक्षांसि रात्रीभिरसुम्नन् तान क्षुब्धान् मृतानपि व्यौच्छत, ते देवा अविदुर्यो वै नोऽयंम्रियते रक्षांसि वा इमं घ्नन्तीति ते रक्षांस्युपामन्त्रयन्त, तान्यब्रुवन् वरं वृणामहे यदसुरान जयाम, तन्नः सहासीदति ततौ वै देवा असुराजयन।[15]

**अथर्ववेदे भूतविद्या**

त्रिभिर्मन्त्रैरग्निः प्रार्थिता दुःस्वप्ननाशनाय। पुनः यो न जीवोऽसि न मृतो देवानामृतगर्भोऽसि स्वप्न' इत्यारभ्य दुःस्वप्न्यं सर्वं द्विषते संनयामसि' इत्यन्तं दुःस्वप्नाद् रक्षा प्रार्थिता।[16]

यत् स्वप्ने अन्नमश्नामि न प्रातरभिगम्यते।
सर्वं तदस्तु मे शिवं नहि तद्दृश्यते दिवा।।[17]

इदं हि भूतविद्याङ्गं महन्महनीयमपि सम्प्रति चिराय विलुप्तप्रायमेवा-लोक्यते। तथा चाधुना भूतविद्यातन्त्राणां नामान्यपि न श्रूयन्ते। तथापि समुपलभ्यमानग्रन्थेषु 'चरकसुश्रुताख्यौ' द्वावेवार्षसंहिता ग्रन्थौ प्राधान्येन प्रथितौ स्तः। अपरश्च वाग्भटाख्यो ग्रन्थ इति त्रयं संहितात्रयी पदमर्हति। तत्र प्राधान्येन भूतविद्याबीजं निहितमास्ते। चरके उन्मादचिकित्सिते,[18]
सुश्रुते अमानुष-प्रतिषेधाध्याये वाग्भटे भूत विज्ञानीय-भूतप्रतिषेधा-ख्याध्याययोः[19] किञ्च सुश्रुतवाग्भटयोः पृथग्भूतविद्याभिधानेऽपि चरकेण उन्मादाधिकार एवान्तर्भावो कृतस्तस्या विद्यया इत्यवसीयते अथ च तत्तत्प्रसङ्गव्याख्याने तद्ग्रन्थटीकाकतृभिरपि क्वचिदपि कस्यापि भूतविद्यातन्त्रस्य प्रमाणानि नोद्धृतानि। तेन च तर्कयामो, यद् बहोः कालाद् भूतविद्यातन्त्राणि विलुप्तानीति।
अनुपलब्धेषु अपि भूतविद्यातन्त्रेषु सर्वथा विलोप एवासीद् भूतविद्याया इति नाशङ्कनीयम्। यतो हि वैदिक-काले-उत्तरकाले चाग्नि-गरुड-ब्रह्माण्ड-विष्णु धर्मोत्तर-पुराणादिषु भूतविद्याविषयाणां सन्निवेशः कृत आस्ते। विभिन्नेषु चायुर्वेदाङ्गेषु भूतविद्याङ्गस्य समावेशः उपलभ्यते। तच्च सर्वं वक्ष्यमाणेषु संहिता-ग्रन्थसन्दर्भेषु स्फुटीकरिष्यते। चरकाचार्यानुसृतमार्गेण तु मानस-रोगाधिकार एव भूतविद्याया अन्तर्भाव इत्यवगम्यते। तथापि 'चरके' विविधेषु प्रसङ्गेषु भूतविद्यायास्तथा समुपवर्णनं कृतम्-अवलोक्यते, येन महर्षिणा चरकेणास्या भूत-विद्याया गौरवपूर्ण- मास्पदमङ्गीकृतमिति मन्यतेऽस्माभिः।
गीतायां स्थित प्रज्ञस्य आदर्श पुरुषस्य च वर्णनमुपलभ्यते[20] सा च स्थितिर्विश्वस्य शान्त्यै सुखाय समृद्धये च प्रभवति। तद् अर्थं च मानसिक क्षेत्रस्य गभीरमध्यनमपेक्षितम्। वैयक्तिकरुपेण सामाजिक रूपेण च शान्तिस्थापनार्थं 'भूतविद्या अध्ययनस्य किमपि विशिष्टं महत्त्वमास्ते'।
लोकतन्त्र-प्रणाल्याञ्च जनसम्मतेर्मूल्यं प्रमुखमास्ते। यदा च जनता विभिन्नाभिः सामाजिक दशाभिः पूर्णरुपेण परिचिता भवति तदा हि शासन व्यवस्था सुचारु रुपेण वतिष्ठते। प्रबुद्धायाः जनतायाश्च व्यवस्था सम्पादने सहयोग प्राप्ति-सम्भवना भवति एवं च लोकतन्त्र प्रणालीसाफल्याय भूतविद्या सम्बन्धि ज्ञानं तथा तत्सम्बद्ध-मानसा मय प्रतीकार-विधानञ्चावश्यकम् अस्ति।

**सन्दर्भ-ग्रन्था**


1. आयुर्वेद का इतिहा, पृष्ठ, 10
2. पुराण-विमर्श, पृष्ठ, 14
3. आयुर्वेद का इतिहास, पृष्ठ, 11
4. तत्रैव, पृष्ठ, 18
5. निजागन्त विभागेन तत्र रोगा द्विधामताः, अष्टाङ्गहृदयम् सू0 1
6. स्व धातुवैषम्य निमिन्तजा ये विकार सङ्घा बहवाः शरीरे।
7. न ते पृथक पित्तकफानिलेभ्य आगन्तवस्त्वेव ततो विशिष्टाः।। चरक सू0, 11/17
8. माधव-निदान, पृष्ठ, 115
9. चरक-संहिता, 7/19
10. तत्रैव, 7-8 अध्याये
11. सुश्रुत संहिता सूत्र, 30/21
12. चरक संहिता सूत्र, 30/21
13. ऋग्वेदे, 1/191/1-16
14. तत्रैव, 1/50/11-13
15. तत्रैव, 10/1/15
16. तैतिरिय संहिता, 2/4/1/1
17. अथर्ववेद, 6/46/1-3
18. तत्रैव, 7/10/1
19. चरक संहिता, अ, 9
20. सुश्रुत संहिता, अ0 6
21. गीता, 2/55-62